International Journal of Sanskrit Research 2020; 6(4): 05-09

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(4): 05-09
© 2020 IJSR
www.anantaajournal.com
Received: 04-05-2020
Accepted: 05-06-2020

**सुरजरायः**
शोधछात्रः, संस्कृतविभागः
रायगञ्जविश्वविद्यालयः
छत्तीसगढ़, भारत

Corresponding Author:
**सुरजरायः**
शोधछात्रः, संस्कृतविभागः
रायगञ्जविश्वविद्यालयः
छत्तीसगढ़, भारत

# चार्वाकीयस्वभाववाद-सांख्यीयपरिणामवादयोः तुलनात्मकमध्ययनम्

## सुरजरायः

**संक्षिप्तसारः**

जगदुत्पत्तेर्व्याख्याने चार्वाकाः कार्य-कारणसिद्धान्तं न स्वीकृतवान्। ते कथितवन्तः स्वभावादेव जगद्वैचित्र्यस्योत्पत्तिरभूत्। स्वभाव एव जगतः कारणं वर्तते – स्वभावो जगतः कारणम् इति। लोकायतिका मन्यन्ते यत् जगदुत्पत्तिविषये कार्य-कारणस्यावश्यकता नास्त्येव। यतोहि कारणं विना एव जगतः सर्वमेव स्वभावादेव जायते। कारणं विनैव कार्य्यं भवति इति स्वभाववादिनः। तथा हि – माधुर्यमिक्षौ कटुतां मरीचे स्वभावतः सर्वमिदं प्रवृत्तमिति। अपरस्मिन् पक्षे सांख्यीयपिरणामवादस्तु कार्यकारणात्मकं मन्यते। तथापि निरीश्वरवादिसांख्याचार्यैः परिणामस्वभावस्य शक्तिं स्वीकृत्य सन् स्वभाववादस्य तुल्यमभवत्। सांख्यकारिकायामाह –

"वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य।।"

अर्थात् यथाऽचेतनस्य क्षीरस्य प्रवृत्तिस्तु स्वभावाज्जायते, तथैव जड़स्वभावयुता प्रकृतिरपि स्वभावादेव पुरुषस्य मोक्षनिमित्तं प्रवृत्तिर्भवति। अत्र हि चार्वाकीयस्वभाववादेन सह सांख्यीयपरिणामवादस्य सादृश्यता वैसादृश्यता च वर्णीयते। अपि च स्वभाववादस्य प्रतिष्ठां क्रियते।

**शब्दकुञ्चिका:-** दर्शनम्, चार्वाकः, सांख्यः, परिणामः, जड़तत्त्वम्, स्वभाववादः, सत्कार्यवादः।

**प्रस्तावना :-**

"को अद्धा वेद क इह प्रवोचत् कुत अजाता कुत इयं विसृष्टिः।"[1]

जगदिदमतीववैभवपूर्णं स्यात्। वैचित्र्यपूर्णस्यास्य जगतोत्पत्तिस्तु कुतः कस्माच्चाभवत्? को वाऽस्य स्रष्टाः? साधारणजनानां चिन्तनस्य विषयोऽयं नास्ति। दार्शनिकैः केवलं वैचित्र्यपूर्णस्यास्य जगदुत्पत्तेः रहस्योद्घाटनार्थं प्रचेष्टां क्रियन्ते। वैभवपूर्णतायाः जगतोऽस्य सृष्टि-स्थिति-प्रलयविषयास्तु सर्वदार्शनिकानां चिन्तनस्य साधारणविषयो वर्तते। प्रत्येकेषामेव दार्शनिकानां मध्ये जगद्वैचित्र्यस्य रहस्योद्घाटनार्थं मतवैविध्यं परिलक्ष्यते।

---
[1] नासदीयसूक्तम्-6

तेषु स्वभाववादस्तु चार्वाकाभिमतं मन्यते। अपि च परिणामवादस्तु सांख्यसम्मतं स्यात्। तत्र चार्वाकस्वीकृतेभ्यः चतुर्भूतेभ्यः स्वभावनियमादेव जगद्वैचित्र्यस्योत्पत्तिर्सम्भवति। स्वभावादेव हि तेषां सृष्टिः,स्थितिः विलयश्च याति। स्वभावाद्विना जगत्सृष्टिविषये कार्य-कारणसम्बन्धस्यावश्यकता नास्त्येव। पुनश्च पञ्चविंशतिस्तत्त्वज्ञैः सांख्याचार्यैः जगदुत्पत्तिर्व्याख्याने परिणामवादाख्यं कार्य-कारणसम्बन्धं स्वीक्रियन्ते। तैरुच्यन्ते व्यक्ततत्त्वानि तु प्रकृतेः परिणामानि। सत्त्वरजस्तमगुणात्मकजडस्वभावा प्रकृतिस्तु चेतनसत्तापुरुषसंयोगाद् जगद्रूपेण परिणतिर्जायते। सांख्यीयपरिणामवादः चार्वाकीयस्वभाववादस्य विरुद्धमतं सदपि सादृश्यवैसादृश्यतया कथं स्वभाववादस्य तुल्ययोग्यं स्यात्, तदेवालोच्यते उत्तरोत्तरेण।

## चार्वाकदर्शनस्य सामान्यपरिचयः

भारतीयदर्शनानि तु प्रमुखतया नास्तिकास्तिकभेदाभ्यां द्विधा विभज्यन्ते। तत्रास्तिकास्तु सांख्य-योग-न्याय-वैशेषिक-मीमांसा-वेदान्ताः। नास्तिकास्तु चार्वाक-बौद्ध-जैनाः। वेदस्यापौरुषेयत्वमस्वीकृतत्वात् चार्वाकादयः नास्तिकसंज्ञायामभिव्यज्यते। तत्र हि चार्वाकदर्शनन्तु नास्तिकशिरोमणिरूपेणाख्यायितं स्यात्। देवगुरुबृहस्पतिना नास्तिकदर्शने प्रत्यक्षैकप्रमाणवादः, सुखवादः, भूतचैतन्यवादः, संशयवादाज्ञेयवादश्चेत्यादिः प्रतिष्ठितः। प्रत्यक्षप्रमाणवादिचार्वाकमतं तु आपातमधुरं स्यात्। साधारणजनाः चार्वाकप्रचारितादर्शे मुग्धाः सन्ति। यतोहि चार्वाकवचनन्तु- “यावज्जीवेत् सुखं जीवेत्” [2] इति। तपश्चर्यादि क्लेशस्वीकृतेऽपि आवश्यिकमृत्योर्हस्तात् किञ्चिदपि नास्ति निस्कृतिरिति। अतो यावत्पर्यन्तं जीवनं स्यात्, तावत्पर्यन्तं सुखाण्वेषणार्थं प्रयासं समीचीनमेव भवेदिति। सामर्थ्यानुसारमेव हि सुखोपभोगस्य परामर्शः प्रदत्ताश्चार्वाकैः।

चार्वाकास्तु जन्मान्तरवादे न विश्वसन्ति। जन्मान्तरवादसमर्थकाः यदि वदेत् अनागतजीवनेऽतिशयसुखलाभार्थं वर्तमानजीवने कष्टसाध्यव्रतचारणोपवासादिपालने का हानिः? तर्हि इत्याशङ्कायां चार्वाकैरुच्यन्ते- “भस्मीभूतस्य देहस्य पुनरागमनं कुतः”[3] इति। देहातिरिक्तात्मा नास्ति यतोहि – “चैतन्यविशिष्टदेह एवात्मा। देहातिरिक्त आत्मनि प्रमाणाभावात्”[4] इति। मरणादनन्तरमेव देहो भस्मिभूतो भवति। देहस्यावर्तमाने जन्मान्तरवादः परलोकप्राप्तेर्वा प्रसङ्ग एव न स्यात्। अतएव जीवितावस्थायां दुःखस्वीकारस्तु सम्पूर्णतया व्यर्थतायाः सूचको वर्तते। वास्तविकतया प्रत्यक्षवहिर्भूतविषयमस्वीकृतत्वात् दर्शनान्तरे स्वीकृतस्य आत्मा-नामकस्य द्रव्यस्य सगुणता तथा धर्माधर्मपापपूण्यान् उपेक्षा कृता चार्वाकैः। चार्वाकमते आत्मा-नामकस्य किञ्चिदपि स्वतन्त्रद्रव्यस्यास्तित्वं नास्तीति। जगतोऽधिकांशजना एव चार्वाकप्रचलितलोककथायाः अनुवर्तीनः भवन्ति। चार्वाकमते अर्थकामौ एव पुरुषार्थौ वर्तते। तत्र हि स्त्रीचुम्बनादिजन्यं सुखमेव परमपुरुषार्थ इति। उक्तमपि - “अङ्गनाद्यालिङ्गनादिजन्यं सुखमेव पुरुषार्थः”[5] इति। अपि च “कण्टकादि जन्यं दुःखमेव नरकः” [6] इति। यतोहि स्वर्गादिरस्तित्वाभावादिति।

## स्वभाववादव्याख्याने चार्वाकाभिमतम्:

चार्वाकैस्तु कार्य-कारणसिद्धान्तं न मन्यन्ते। स्वभाववादेन हि तैः जगदुत्पत्तेर्व्याख्यानं प्रदत्तम्। भारतवर्षस्य प्राचीनतमे साहित्ये ऋग्वेदे ऋषिणा परमेष्टिप्रजापतिनाऽत्यन्तसंशयचित्तेन आत्मनं जगद्वैचित्र्योत्पत्तेः आदिकारणं जिज्ञासितम् “अम्भः किमासीत् गहनं गभीरम् ?[7] इति। अर्थात् किं तर्हि अगाधनिविड़जलराशिरेवासीत् ? अथवा तदेव स्यादित्याशंकायां पुनः ऋषिणोक्तम् – “सलिलं सर्वमा इदम्” [8] इति। ऋषेः चित्तं यदा एतादृशशङ्कायां दोदुल्यमानमभवत् तदैव हि ऋषिणा ध्यानेनावगम्याह –

> कामस्तदग्रेसमवर्तताधि मनसो रेतः प्रथमं यदासीत्।
> सतो बन्धुमसतिनिरविन्दन् हृदि प्रतिष्या कवयो
> मनीषा।।[9]

जल एव स्वभावनियमात् जगद्वैचित्र्यरूपेण परिणतिर्लभते। स्वभावनियमोऽयं हि अथवा पदार्थस्य प्रतिनियतशक्तिरेव हि परमेष्ठेः कामं सिसृक्षां वा वर्तते। नास्त्येषा तु ईश्वरस्य सिसृक्षा। एषा पदार्थस्य स्वभावनियम-परिणमनप्रवणता। अत्र हि परिणमनप्रवणताशक्तिस्तु जलाश्रिता, अपि च ऋषेः कामस्तु मनसो रेत अर्थात् मूलीभूतोपादानं वर्तते। ऋषिणा प्रज्ञाबलेन विज्ञातं यत् – असता सह सतः अथवा अचेतनेन सह चेतनस्य सम्बन्धं विद्यते अर्थात् अचेतनमेव हि चैतन्यस्याधिष्ठानं तद्विज्ञातम्। एवमेव हि ऋषिणा

[2] चार्वाकषष्ठी-55
[3] तदेव
[4] चार्वाकदर्शनम् (सर्वदर्शनसंग्रहः)
[5] तदेव
[6] तदेव
[7] नासदीयसूक्तम्-1
[8] तदेव -3
[9] नासदीयसूक्तम्- 4

परमेष्ठिना जड़स्वभावं जलमेव जगतः मूलकारणं निर्धारितम्।
चार्वाकैः चतुर्विधभूतानि स्वीकृतानि। तथा चोक्तम् – "अत्र चत्वारि भूतानि भूमिवार्य्यनलानिलाः" [10] इति। सर्वसिद्धान्तसंग्रहे लोकायतिकपक्षप्रकरणेऽप्याह-

लोकायतिकपक्षे तु तत्त्वं भूतचतुष्टयम्।
पृथिव्यापस्तथा तेजो वायुरित्येव नापरम्।।[11]

अर्थात् पृथिवी-अप-तेज-वायव एतानि चत्वारि भूतानि। एतेभ्यः भूतचतुष्टयेभ्यः जगद्वैचित्र्योत्पत्तिर्जायते। देवगुरुणा बृहस्पतिना आह – "पृथिव्यप्तेजो वायुरिति तत्त्वानि। तत्समुदाये शरीरेन्द्रियविषयसंज्ञा।"[12]
सम्प्रति आशङ्का भवितुमर्हति यत् – कथमेतेभ्यः चतुर्भूतेभ्यः जगदोत्पत्तिर्जायते यदि कार्य-कारणसम्बन्धं न स्वीक्रियते ? चार्वाकैरुत्तरं प्रदीयते स्वभावादेव हि जगदोत्पन्नं विनष्टश्च जायते – "स्वभावात् तद् व्यवस्थितिः" [13] इति। स्वभाव एव जगद्वैचित्र्यताया अपि कारणं वर्तते। यथाह – "अपरे लोकायतिकाः स्वभावं जगतः कारणमाहुः। स्वभावादेव जगत् विचित्रमुत्पद्यते , स्वभावतो विलयं याति" इति। स्वभाववादीनां मते तु "स्वत एव भावा जायन्ते"[14] इति। पदार्थस्योत्पन्नं स्वभावजन्यम्।
"स्वस्य भावः स्वभावः" इति। स्वभाव इति शब्दादेव प्रतीयते यदेकस्य धर्मस्तु कदापि अपरस्य स्वभावो भवितुं नार्हति – "न ह्येकमनेक स्वभावो नाम, व्याघातात्"[15] इति। चार्वाकैः सुखानुभूतेः दुःखानुभूतेर्वा कारणान्तरं निरर्थकं मन्यन्ते। यतो हि स्वभावादेव मानवाः सुख-दुःखानि अनुभवन्ति। सर्वसिद्धान्तसंग्रहे लोकायतिकपक्षप्रकरणे आह –

न कल्प्यौ सुख-दुःखाभ्यां धर्माधर्मैः परैरिह।
स्वभावेन सुखी दुःखी जनोऽन्यन्नैव कारणम्।।[16]

पुनश्चोच्यते –

शिखिनश्चित्रयेत् को वा कोकिलान् कः प्रकुज्ययेत्।
स्वभावव्यतिरेकेण विद्यते नात्रकारणम्।।[17]

अर्थात् स्वभावव्यतिरेकेण हि नात्र किमपि कारणं भवितुमर्हति। अत्र हि स्वभाववादिनः स्वभावनियमस्य कारणता स्वीकृतवन्तः। पक्षान्तरे तु यदृच्छावादिनः स्वभाववादं निराकृत्वा यदृच्छावादोपस्थापयितुं प्रयासं कृतवन्तः। तैरुच्यन्ते जगतः सर्वमेव – "अकस्मादेव भवति" इति। तेषां मते कार्यवस्तुः स्वभावनियमस्याधिनं न मन्यते। कारणाद्विनैव पदार्थस्योत्पत्तिर्भवति – "न स्वतो न परतो भावानां जन्म। स्वपरकारणनिरपेक्षं सर्वहेतुनिराशंसं भावानां जन्म।"[18]
अथ हि यादृच्छिककवादिनाम् आकस्मिकवादिनां वा मतं निराकर्तुमाह – स्वभावादेव तदुत्पत्तेः [19] इति। उदाहरणतयोपस्थापितम् –

अग्निरुष्णो जलं शीतं समस्पर्शस्तथानिलः।
केनेदं चित्रितं तस्मात् स्वभावात्तद्व्यवस्थितिः।।[20]

अत्र हि अग्नेरुष्णता, जलस्य शीतलता, वायोः समस्पर्शतायाः च कश्चिदपि सम्पादनकर्ता नास्त्येव। स्वभावादेव वैचित्र्यमिदं सम्पन्नम्। स्वभाववाद अत्यन्तप्राचीनमतवादो वर्तते। श्वेताश्वतरोपनिषदि स्वभाववाद-यदृच्छावादयो उल्लेखं प्राप्यते। यथा – "स्वभावमेके कवयो वदन्ति" [21] इति। अपि च "कालः स्वभावो नियतिर्यदृच्छा"[22] इति।
स्वभाववादिनां मतानुसारन्तु वस्तुसृष्टेः कारणतया विविधकार्य-कारणसम्बन्धादपेक्षया अतीव श्रेयस्करः स्वभाववाद इति। यतो हि – "माधुर्यमिक्षौ कटुतां मरीचे स्वभावतः सर्वमिदं प्रवृत्तम्"[23] इति।
अतएव स्वभावादेव सर्वेषां वस्तुनां प्रवृत्तिर्जायन्ते।

**सांख्यदर्शनसम्मतपरिणामवादः-**

परिणामवादात्मकं तत्त्वं सांख्यदर्शनसम्मतं मन्यते। सांख्यमते जगदिदं मूलप्रकृतेः प्रधानस्य वा विकारः परिणामो वा वर्तते। सांख्यदर्शने पञ्चविंशतितत्त्वानि स्वीकृतानि। तान्येव तत्त्वानि चतुर्विधभावनया विभज्यन्ते। यथा – (1) कश्चिदर्थः प्रकृतिः, (2) कश्चिदर्थः विकृतिः, (3) कश्चिदर्थः प्रकृतिश्च विकृतिश्च, (4) कश्चिदर्थः न प्रकृतिर्नविकृतिरिति। प्रसङ्गेऽस्मिन् सांख्यकारिकायामाह –

10 चार्वाकषष्ठी- 48
11 सर्वसिद्धान्तसंग्रहः(लोकायतिकपक्षप्रकरणम्)-1
12 बार्हस्पत्यसूत्रम् – 1,2
13 सर्वदर्शनसंग्रहः, चार्वाकदर्शनम्
14 भट्टोत्पल-बृहत्संहितायाः टीका -1.7
15 न्यायकुसुमाञ्जलिः
16 सर्वसिद्धान्तसंग्रहः(लोकायतिकपक्षप्रकरणम्)-4
17 तदेव-5
18 द्रष्टव्यम्, सर्वदर्शनसंग्रहः(चार्वाक-बौद्ध-जैन),पत्रसंख्या- 80
19 चार्वाकदर्शनम् (सर्वदर्शनसंग्रहः)
20 तदेव
21 श्वेताश्वतरोपनिषद् - 6.1
22 श्वेताश्वतरोपनिषद् -1.2
23 द्रष्टव्यम्, चार्वाकदर्शन, दक्षिणारञ्जन शास्त्री,पत्रसंख्या-81

"मूलप्रकृतिरविकृति महदाद्याः प्रकृतिविकृतयः सप्त।
षोड़शकस्तु विकारो नप्रकृतिर्न विकृतिः पुरुषः।।"[24]

अर्थात् मूलप्रकृतिः प्रधानो वा प्रकृतिरेव, न सा कस्यापि विकृतिरिति। महदहंकारौ पञ्चतन्मात्राणि च सप्तौ प्रकृतिरपि विकृतिरपि च। षोड़शकस्तु विकार इति। तानि मनः, पञ्चबुद्धीन्द्रियाणि, पञ्चकर्मेन्द्रियाणि पञ्चमहाभूतानि च। न कस्यापि प्रकृतिः नापि कस्यचिद्विकृतिरिति एक एव पुरुष इति। एतानि पञ्चविंशतितत्त्वानि। चतुर्विधभावात्मकपञ्चविंशतितत्त्वानि तु पुनः व्यक्ताव्यक्तज्ञ इति रूपेण त्रिविधं मन्यते। अत्र हि व्यक्तं मूलप्रकृतिः, त्रयोविंशतितत्त्वानि अव्यक्तानि, पुरुषस्तु ज्ञ इति।
सांख्यमते मूलप्रकृतिरेव यथार्थतया अखिलवस्तुरूपेण परिणमति। जड़स्वभावत्त्वादपि तस्मात्प्रधानात् महत् बुद्धिर्वा, महतः अहंकारः, अहंकारात् एकादशेन्द्रियाणि पञ्चतन्मात्राणि च, तेभ्यः च पञ्चमात्रेभ्यः फञ्चमहाभूतानि क्रमानुसारेण हि प्रकृतेरेव परिणामानि वर्तन्ते। सांख्यकारिकायामाह –

"प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोड़शकः।
तस्मादपि षोड़शकात् पञ्चभ्यः पञ्चभूतानि।।"[25]

पुनश्च अभिमानाभिधानयुताहंकारस्तु महत्तत्वस्य विकारः परिणामो वेत्युक्तं पूर्वम्। सम्प्रति महतः परिणामस्वरूपादहंकारात् षोड़शकानां परिणतिर्वर्णीयते सांख्यकारिकायाम्। यथा –

"अभिमानोऽहंकारस्तस्माद्विविधः प्रवर्तते सर्गः।
एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव।।
सात्त्विक एकादशकः प्रवर्तते वैकृतादहंकारात्।
भूतादेस्तन्मात्रः सः तामसस्तैजसादुभयम्।।
बुद्धीन्द्रियाणि चक्षुः श्रोत्रघ्राणरसनत्वगाख्यानि।
वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः।।"[26]

अथ हि स्वाभाविकतया सन्देहो भवितुमर्हति यत् – जड़स्वभावत्त्वात् कथं तस्मात् प्रकृतेः जगत्परिणमितुं शक्यते ? इत्यस्योत्तरे वक्तुं शक्यते पुरुषसंयोगादिति। यतो हि "सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः" [27] इति। प्रकृतेः गुणवत्ता सदपि सा जड़स्वभावा। पुरुषस्तु चेतनत्वादपि निर्गुणः। अत उभयोः संयोगादेव जगत उत्पत्तिर्सम्भवति। तच्चोक्तं सांख्यकारिकायाम् –"पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।।" [28] इति एवं हि पङ्ग्वन्धवत् प्रकृतिपुरुषयोः संयोगेनैव व्यक्ततत्त्वानि जगद्रूपेण परिणतिर्लभते। एतस्मादेव हि सांख्यपरिणामवादः सिद्धिर्भवति।

## स्वभाववाद-परिणामवादयोः सादृश्यं वैसादृश्यञ्च

### सादृश्यम् :-

पदार्थानां प्रतिनियतशक्तिरेव स्वभावपदवाच्यं स्यात्- "स्वभावः पदार्थानां प्रतिनियतशक्तिः"[29] इति। स्वभावादेव हि जगद्वैचित्र्यस्योत्पत्तिः, स्थितिः विलयञ्च याति। यतो हि "स्वभावो जगतः कारणम्" [30] इति। उक्तमपि – "जगद्वैचित्र्यमुत्पद्यते स्वभावतो विलयं याति। स्वभाव एव हेतुः। स्वाभाविकं जगदिदम्" [31] इति। स्वभावनियमात् भूतचतुष्टयानामिन्द्रियग्राह्यपरमाणुभ्यः चैतन्यस्योत्पत्तिर्जायते।
अपरस्मिन्पक्षे आस्तिकपर्यायभूतोऽपि सांख्यदर्शनन्तु निरीश्वरवादीदर्शनरूपेण परिगण्यते। ईश्वरासिद्धेः इत्युक्तत्वात् परिणामस्वरूपस्यास्य जगतः कारणतया ईश्वरमस्वीकृतं सांख्याचार्यैः। यतो हि पूर्वालोचनानुसारं प्रकृति-पुरुषसंयोगादेव जगत्परिणतिर्जायते। एवं हि निमित्तकारणस्य कार्योत्पादिकाशक्ति अस्वीकृत्य अपि च परिणामस्वभावस्य शक्तिः स्वीकृते सति सांख्यपरिणामवादस्तु स्वभाववादेन सह सादृश्यतोपस्थाप्यते। यथा सांख्यकारिकायामाह –

"वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य।।"[32]

अर्थात् यथाऽचेतनस्य क्षीरस्य प्रवृत्तिस्तु स्वभावाज्जायते, तथैव जड़स्वभावयुता प्रकृतिरपि स्वभावादेव पुरुषस्य मोक्षनिमित्तं प्रवृत्तिर्भवति।

### वैसादृश्यम् :-

निरीश्वरवादीनः सांख्याचार्याः जगत्परिणामस्य निमित्तकारणतया ईश्वरस्यास्तित्वं न स्वीकृतेति पूर्वमालोचितम्। किन्तु सांख्यमतावलम्बिनः दार्शनिकास्तु

---

[24] सांख्यकारिका-3
[25] सांख्यकारिका -22
[26] तदेव -24,25,26
[27] सांख्यतत्त्वकौमुदी
[28] सांख्यकारिका -21
[29] द्रष्टव्यम्, चार्वाकदर्शन, दक्षिणारञ्जन शास्त्री,पत्रसंख्या-81
[30] तदेव
[31] तदेव
[32] सांख्यकारिका -57

जगद्वैचित्र्यव्याख्यार्थं कार्य-कारणसिद्धान्तं स्वीकृतवान्। यतो हि समुदयविश्वव्यापारमेव कार्य-कारणसूत्रेण ग्रथितं स्यात्। न हि कारणं विना कार्योत्पत्तिर्जायते। कारणं हि कार्योत्पत्तेः नियतपूर्वभावित्त्वं वर्तते। सांख्यकार्य-कारणवादस्तु सत्कार्यवादरूपेणाभिधीयते। उक्तमपि सांख्यकारिकायाम् –

"असदकारणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकारणात् कारणभावाच्च सत्कार्यम्।।"[33]

विपरीते तु चार्वाकैः पुङ्खानुपुङ्खरूपेण विश्लेषणतया जगतः वैचित्र्यता असाम्यता च कार्य-कारणसम्बन्धान्तरं वर्तते इति प्रमाणितम्। कार्य-कारणसम्बन्धस्तु सव्यभिचारी वर्तते। अतो हि सर्वेषां कार्याणामेव हि कारणं भवेदिति न समिचीनम्। कारणाद्विनाऽपि कार्योत्पत्तिर्भवति। यथा अग्नेरुष्णता, जलस्य शीतलता, वायोः समस्पर्शता प्रभृतयः स्वभावनियमादेव जायन्ते-"स्वभावादेव तदुत्पत्तेः"[34] इति। उक्तमपि –

"अग्निरुष्णो जलं शीतं समस्पर्शस्तथानिलः।
केनेदं चित्रितं तस्मात् स्वभावात्तद्व्यवस्थितिः।।"[35]

स्वभावादेव वस्तुनां प्रवृत्तिर्जायन्ते। तस्य पुनरेकमुदाहरणं यत् – "कः कण्टकानां प्रकरोति तैक्ष्ण्यं विचित्रभावं मृगपक्षिणाञ्च माधुर्य्यमिक्षोः कटुताञ्च निम्बे स्वभावतः सर्वमिदं प्रवृत्तम्"[36] इति। अतएव स्वभावमेव जगद्वैचित्र्यस्य नियामकमात्रं स्यात्। स्वभावस्य नियामकं किमपि कारणं न स्यात्।

## उपसंहारः

असतः सदजायत इति। असतः अर्थात् अचेतनादेव चेतनस्योत्पत्तिरभूत्। जगद्वैचित्र्यस्य मूलीभूतकारणन्तु जडस्वभावः। तस्माद्धि चैतन्योत्पत्तिर्जायते। नागोजि भट्टेनाह – "असत् जडवर्गः सत् चैतन्यवर्गः[37] इति। तैत्तिरीयब्राह्मणे परिलक्ष्यते "असदेवेदमग्र आसीत्"[38] इति। अर्थात् जडचैतन्यमयवैचित्र्यपूर्णजगदपि आद्यावस्थायाम् असदेवासीत्।

[33] सांख्यकारिका -9
[34] चार्वाकदर्शनम् (सर्वदर्शनसंग्रहः)
[35] तदेव
[36] द्रष्टव्यम्,चार्वाकदर्शन, दक्षिणारञ्जन शास्त्री,पत्रसंख्या-81
[37] तदेव, पत्रसंख्या-78
[38] तदेव, पत्रसंख्या-78

अतएव जडवस्तुनां स्वभावप्रवृत्तेरेव जगद्वैचित्र्योत्पत्तिर्सम्भवति। कार्य-कारणसम्बन्धस्यावश्यकता तत्र नास्त्येव। उक्तञ्च- "कारणं विनैवं कार्य्यं भवति इति स्वभाववादिनः" [39] इति। स्वभावोऽपि कस्यापि कारणं नास्ति- "स्वतोभावे ह्यहेतुत्वम्"[40] इति।
अपरस्मिन् पक्षे निरीश्वरवादिसांख्याचार्यैरपि परिणामस्वभावस्य शक्तिः स्वीकृते सति स्वभाववादस्य तुल्यमभवत्।

## निर्वाचितग्रन्थाः

### मुख्यग्रन्थाः


1. चार्वाक-बौद्ध-जैनदर्शन (सायनमाधवीय सर्वदर्शनसंग्रह), अमित भट्टाचार्य(सम्पादकः), संस्करण 2013, संस्कृत पुस्तक भाण्डार, कलकाता
2. सर्वदर्शनसंग्रहः (माधवाचार्यकृतः), उमाशङ्कर शर्मा(सम्पादकः), संस्करण 2016, चौखम्बा विद्याभवन, वाराणसी
3. सांख्यदर्शनम् (महर्षिकपिलप्रणीतम्), जनार्दनशास्त्री पाण्डेयः(सम्पादकः), 1म संस्करण 1989, मोतिलाल बनारसी दास, वाराणसी,
4. सांख्यकारिका (ईश्वरकृष्णविरचिता), राकेश शास्त्री(सम्पादकः), संस्करण 2017, संस्कृत ग्रन्थागार, दिल्लि
5. षड्दर्शनसमुच्चय (परमार्हद्धरिभद्रसूरीप्रणीत), श्रीनिवास शर्मा(सम्पादकः), 2य संस्करण 2012, चौखम्बा कृष्णदास अकादमी, वाराणसी
6. सायणमाधवीय सर्वदर्शनसंग्रह (खण्ड-1,2), सत्यज्योति चक्रवर्ती (सम्पादकः), संस्करण 2014, साहित्यश्री, कोलकाता


### सहायकग्रन्थाः


1. मिश्रा, जगदिश्चन्द्र, भारतीय दर्शन (1), वाराणसी, चौखम्बा सुरभारती प्रकाशन, संस्करण 2016
2. शास्त्री, दक्षिणारञ्जन, चार्वाक दर्शन, कलकाता, पश्चिमबङ्ग राज्यपुस्तक पर्षत्, तृतीयसंस्करण 1999


[39] तदेव, पत्रसंख्या-82
[40] तदेव, पत्रसंख्या-82